# राष्ट्रियशिक्षानीत्याः(2020) परिप्रेक्ष्ये संस्कृतविद्यालयपाठ्यक्रमः

डा. इक्कुर्ति वेङ्कटेश्वर्लु
शिक्षाविभागः, शिक्षापीठम्
श्रीलालबहादुरशास्त्रिराष्ट्रियसंस्कृतविश्वविद्यालयः, नवदेहली

**Article Info**
Volume 6, Issue 3
Page Number : 35-41

**Publication Issue :**
May-June-2023

**Article History**
Accepted : 01 June 2023
Published : 12 June 2023

**शोधसारांशः-** राष्ट्रियशिक्षानीत्यां (2020)विश्वविद्यालयाः बहुविषयात्मिकाः विश्वविद्यालयाः भवेयुः इत्यस्य सम्प्रत्ययः मया एवम् अवगतःयत् संस्कृतच्छात्राणाम् आत्मनिर्भरतायै , आजीविकायै च अवसरं प्राप्नुयुः तदर्थं समग्रतविकासःसम्पादनाय अवसरोपि कल्पनीयः तदर्मपि संस्कृतक्षेत्रे संस्कृतसम्बद्धाः विभिन्नपाठ्यक्रमाः निर्मातव्याः ते च पाठ्यक्रमाः कौशलविकासाय भवेयुः न तु केवलं बौद्धिकविकासाय तेन संस्कृतमधीयानाः छात्राः शिक्षकवृत्तौ एव न भिन्नेषु व्यवसायेषु च आजीविकां स्वयमेव सम्पादयेयुः इति मे धीः।

**मुख्यपदानि –** राष्ट्रियशिक्षानीतिः, संस्कृतविद्यालयाः, पाठ्यक्रमः, आत्मनिर्भरता, स्तरवर्धनम्, चिन्तनपरिवर्तनम् ।

**अमूर्तः** - शिक्षा मानवस्य आत्मनिर्भरतायै पथपदर्शनं करोतीति विदितः विषयः , परन्तु नैकेभ्यः वर्षेभ्यः प्रायः शिक्षिता अपि आत्मनिर्भराः न अवलोक्यन्ते अपि च आजीविकायै निरीक्षमाणाः अर्धं जीवनं यापयन्तः दरीदृश्यन्ते। परञ्च राष्ट्रियशिक्षानीत्यां छात्रस्य समग्रतायाः विकासे पदे पदे उल्लेखः कृतः वर्तते। अर्थात् छात्रः स्वीयकौशले वा स्वीयसामथx वा आत्मनिर्भरः भवेत् तदर्थं छात्रेभ्यः शिक्षा प्रेरणां दद्यादिति। संस्कृतक्षेत्रेपि संस्कृतच्छात्राणाम् आत्मनिर्भरतायै नैके उपायाः वर्तन्ते। यथा :- गुणवत्तावर्धनम्, नाटकरङ्गः, चलचित्ररङ्गः, कथा रचयिता, योगः इत्यादयः संस्कृच्छात्राणाम् आत्मनिर्भरतां पोषयतीति अनुसन्धातुः विश्वासः वर्तते ।

**उद्देश्यानि**

1. संस्कृतक्षेत्रस्य स्तरवर्धनम्
2. संस्कृतच्छात्राणां स्तरवर्धनम्
3. संस्कृतक्षेत्रस्य कौशलविकासंवर्धनम्
4. संस्कृतच्छात्राणाम् आजीविकायाः मार्गप्रदानम्
5. संस्कृतच्छात्राणां चिन्तनपरिवर्तनम्
6. संस्कृतक्षेत्रे पाठ्यचर्यायाः नवीकरणम्
7. संस्कृतक्षेत्रे अन्तरानुशासनिकपाठ्यचर्यायाः निर्माणम्

**प्रास्तावः**- भारतं परिवर्त्यमानं वर्तते। अस्य कारणं शिक्षेति निर्विवादांशः अनया शिक्षया विज्ञाने, अर्थिके, सामजिके, प्रद्यौगिक्यां च परिवर्तनानि जायमानानि दृश्यन्ते। शिक्षया यथा समाजे नैकानि परिवर्तनानि दृश्यन्ते तथैव समाजेन शिक्षयामपि परिवर्तनम्

**Copyright:** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

अपेक्षते। परिवर्तनं जायमानं च वर्तते। सामन्यतः समाजे काचित् प्रदा वर्तते यत् शिक्षयैव सर्वकारस्य उद्योगः भवति। वस्तुतः इदं च चिन्तनम् आङ्लेय्यानां शासनकालात् आरब्धा वर्तते। परन्तु भारते आबहोकालात् मनुष्यः आत्मनिर्भरः आसीत्। तस्य कारणं शिक्षैव अतः शिक्षया अन्यस्योपरि आधारितः भवेयमिति चिन्तनात् शिक्षया आत्मनिर्भरत्वं प्राप्नुयात् समाजः। साम्प्रतमपि समाजे नैके शिक्षया आत्मनिर्भराः वर्तन्ते आधुनिकया विद्यया । प्राचीनकाले संस्कृतक्षेत्रे संस्कृतविद्यया आत्मनिर्भराः दृश्यन्ते स्म तथा परन्तु आधुनिके काले संस्कृतक्षेत्रे आत्मनिर्भराः न दृश्यन्ते केवलं शिक्षकवृत्तिं विहाय अन्या वृत्तिरेव नैव अवलोक्यन्ते। अतः शिक्षानीत्याम् आत्मनिर्भरतायै विविधविषयात्मकविश्वविद्यालयाः भवेयुः इति उल्लेखः कृतः वर्तते।

**राष्ट्रियशिक्षानीत्याम् (2020)**

**समग्रां बहुविषयिकां शिक्षां प्रति**

11.1 भारते समग्रतया बहुविषयकरूपेण अध्ययनम् काचित् प्राचीना परम्परा विद्यते। तक्षशिला,नालन्दा-इत्यादिविश्वविद्यालयादारभ्य एतादृशव्यापकसाहित्यं विद्यते यत् विभिन्नक्षेत्रीयविषयान् अपि संयोजयति । प्राचीनभारतीयसाहित्यम् बाणभट्टस्य कादम्बरी शिक्षायाः 64 कलाः ज्ञानरूपेण वर्णयति । 64 कलासु न केवलं गायनं चित्रकला इत्यादिविषयाः अन्तर्भूताः किन्तु रसायनशास्त्रं, गणितम्, इत्यादिवैज्ञानिकक्षेत्राणि, तक्षककार्यम्, वस्त्रसीवनकला, इत्यादिवृत्तिपरकक्षेत्राणि, औषधीयकार्यम्, अभियान्त्रिकी इत्यादिव्यावसायिकक्षेत्राणि, सम्पेषणा, चर्चा, संवादः इत्यादिव्यावहारिककौशलानि (साफ्ट स्किल) च अन्तर्भूतानि । गणितम्,विज्ञानम्, वृत्तिपरकविषयाः, व्यावसायिकविषयाः, च अन्तर्भूय मानवसर्जनस्य सर्वाणि क्षेत्राणि कलाः इति परिगणयेत् इति भारतीयचिन्तनम् अस्ति । अस्य दृष्टिः नैककलाज्ञानम्, यथा आधुनिककाले समान्यतः कथ्यते उदारकला(कलानाम् उदारकल्पना) इति। एतत् भारतीयशिक्षायां पुनः अवश्यं समायोजनं भवेत् । यतः इयमेव शिक्षा एकविंशतिशताब्दौ अपेक्षिता विद्यते ।

11.2 आकलनेन ज्ञातं यत् स्नातकशिक्षाकाले शिक्षणपद्धतौ विज्ञानम्, गणितम्, तान्त्रिकम्, अभियान्त्रिकम्, (एसटीईएम्) इतिविषयैः सह कला मानवीयशिक्षा च समाविष्टा चेत् सर्जनता,नवाचारः,आलोचनात्मकचिन्तनम्,उच्चस्तरीयचिन्तनक्षमता,समस्यासमाधानयोग्य ता, समूहकार्यदक्षता, सम्पेषणकौशलम्, तलस्पर्श्यध्ययनम्,पाठ्यक्रमस्य सर्वविषयेषु ज्ञानम्, सामाजिकनैतिकताजागरूकता, इत्यादिधनात्मक शैक्षणिकपरिणामः प्राप्तो वर्तते । अनेन सह समग्रबहुविषयकशिक्षाविधानेन अनुसन्धानेपि प्रगतिः जाता अस्ति ।

11.3 समग्रबहुविषयकशिक्षा मनुष्यस्य सर्वसामर्थ्यानां बौद्धिकम्, सौन्दर्यात्मकम्, सामाजिकम्, शारीरिकम्, भावनात्मकम्, नैतिकम् इत्यादीनां सामैक्येन विकासं कर्तुं लक्ष्यं स्थापयति।कला मानवीयमौल्यानि, भाषाः, विज्ञानम्, वृत्तिः, तान्त्रिकम्, व्यावसायिकक्षेत्रम्, सामाजिकसंयोजननीतिः, संप्रेषणम्, चर्चा, वाद-विवादः, इत्यादिव्यावहारिककौशलम्, चितक्षेत्रे अथवा अन्यक्षेत्रे तलस्पर्शिज्ञानम् इत्येतादृशशिक्षणम् एकविंशतिशतब्द्यां सर्वतोमुखविकासयुक्तव्यक्तेः अभिवृद्ध्ये सहायं करोति । एतादृशसमग्रशिक्षा एव अधिककालं यावत् व्यावसायिकक्षेत्रेण तान्त्रिकक्षेत्रेण च सह स्नातककार्यक्रमस्य दृष्टिः भवति ।

11.4 भारतस्य इतिहासे सुन्दरतया उपवर्णिता समग्रबहुविषयकशिक्षा वास्तवरूपेण अधुना अपेक्षिता वर्तते येन वयम् एकविंशतिशतब्द्याः चतुर्थप्रौद्योगिकक्रान्तेः नेतृत्वं कर्तुं शक्नुमः ।अभियान्त्रिकीसंस्थाः आईआईटी इत्यादयः कलामानवीयमौल्यम् इत्यादिभिः सह समग्रबहुविषयकशिक्षां प्रति अग्रे सरेयुः । कला- मानवीयमौल्यविषयस्य छात्राः विज्ञानम् अधीयते अपि च सर्वे व्यावसायिकविषयं व्यावहारिकौशलं (साफ्ट स्किल) पठितुं प्रयतन्ते । संभावनानां सर्जनं भवति । स्नातकोत्तरस्तरे

11.5 काल्पनिक-आनम्य- पाठ्यक्रमसंरचना: अध्ययनार्थं विषयाणां रचनात्मकसंयोजनं सशक्तीकुर्वन्ति एवं नैकप्रवेशनिर्गमनबिन्दून् अपि प्रददति । अत: अधुना विद्यमानां कठोरनियमसीमां परिमार्ण्य आजीवनाधिगमस्य कृते बृहद्बहुविषयकविश्वविद्यालयेषु स्नातकस्तरे कठोरानुसन्धानाधारितविषयविशेषस्य प्रदानेन सह बहुविषयककार्यार्थम् अवसर: प्रदीयते ।

11.6 बहुविषयकविश्वविद्यालया: महाविद्यालया: समग्रगुणवत्तां बहुविषयकशिक्षां च प्रति अग्रे सरेयु: । विषयेषु कठोरपरिणित्या सह छात्राणां कृते पाठ्यचर्यायाम् आनम्यता नूतनाकर्षकपाठ्यक्रमस्य विकल्प: च प्रदीयते । पाठ्यक्रमनिर्धारणे संकायसदस्यै: संस्थागतास्वायत्तेन च एतत् प्रोत्साह्यन्ते । शिक्षणशास्त्रे संवादम्, चर्चाम्, वाद-विवादम्, अनुसन्धानम्, भिन्नशास्त्रीयान्त: शास्त्रीयचिन्तनं च प्रति अधिकं बलं प्रदास्यते ।

11.7 देशस्य विभिन्नो शिक्षासंस्थासु (एईआई ) भाषा, साहित्यम्, संगीतम्, दर्शनम्, भारतविद्या, कला, नृत्यम्, नाट्यकला, शिक्षा, गणितम्, सांख्यिकी, सैद्धान्तिकव्यावहारिकविज्ञानम्, समाजशास्त्रम्, अर्थशास्त्रम्, क्रीडा, अनुवाद: व्याख्यानं च, इत्येदृशबहुविषयकविभागानां कृते भारतीयशिक्षावातावरणस्य स्थापनं प्रोत्साहनं च क्रियते । एषु विषयेषु सर्वेषु स्नातकोपाधिकार्यक्रमेषु क्रेडिट्-प्रदास्यते किन्तु यदा ते विषया: एच्ईआई कक्षायां नोपलभ्यन्ते तदा एतादृशविभागेन अथवा ओडीएल माध्यमेन च कुर्यु:।

11.8.एतादृशबहुविषयकशिक्षाया: साधनाय सर्वासानां उच्चशिक्षासंस्थानाम् आनम्ययुक्तनवीनपाठ्यक्रमे क्रेडिट-आधारितपाठ्यक्रम: समुदायनियोग:, सेवा पर्यावरणशिक्षा, मूल्याधारितशिक्षा च अन्तर्भवेयु: । पर्यावरणशिक्षायां जलवायुपरिवर्तनम् प्रदूषणम्, त्याज्यनिर्वहणम्, स्वच्छता, जैविकविविधताया: संरक्षणम्, जैविकसंसाधनानां प्रबन्धनम्, वनवन्यजीविसंरक्षणम्, सुस्थिराभिवृद्धि: च अन्तर्भवन्ति । मूल्याधारितशिक्षायां मानवीय- नैतिक- संवैधानिक-सार्वभौमिकमूल्यानि यथा सत्यम्, धर्म: शान्ति:, प्रेम, अहिंसा, वैज्ञानिकदृष्टिकोण:, नागरीकमौल्यानि जीवनकौशलम् सेवा, सामुदायिककार्यक्रमेषु भागग्रहणम्, च समग्रशिक्षणस्य अभिन्नम् अङ्गमिति परिगण्यते । यदा यदा विश्वं परस्परं संमिलत् वर्तते तदा वैश्विकनागरिकशिक्षा, (जीसीईडी), समकालिकवैश्वकप्रत्याह्वानस्य प्रतिक्रिया कर्तुं, शिक्षार्थिनां कृते वैश्विकविषयं विज्ञातुम्, अधिकशान्तिपूर्ण सहिष्णु-समावेशि- सुरक्षित सक्रिय प्रवर्तको भवितुं च प्रदीयते । अन्तत: समग्रशिक्षाया: अन्तर्गतम् उच्चशिक्षासंस्था स्वकीयसंस्थासु अन्योच्चशिक्षा/शोधसंस्थासु वा स्थानीयोद्योगेन, व्यवहारेण,कलाविद्भि:, शिल्पकारै: च सह अन्तस्सम्बन्धावसरस्योपलब्धि: एवम् अध्यापकै: शोधार्थिभि: सह अन्तस्सम्बन्धावसरस्योपलब्धि: च कार्यते येन छात्रा: सक्रियरूपेण स्वज्ञानार्जनव्यावहारिकपक्षेण सह योजिता: स्यु: एवं स्वोद्योगसंभावनामपि वर्धयितुं शक्नुयु: ।

11.9 उपाधिकार्यक्रमाणाम् अवधौ संरचनायां च अपेक्षानुसारं परिवर्तनं क्रियते । स्नातकोपाधि: वर्षत्रयस्य वर्शचतुष्टयस्य वा भवेत् तत्र उपयुक्रप्रमाणपत्रेण सह त्यागार्थमपि विकल्पा: भवन्ति । उदाहरणार्थम् - व्यावसायिक क्षेत्रवृत्तिपरक्षेत्रसहिते कस्मिन्नपि विषये अथवा क्षेत्रे एकं वर्षं पूर्यते चेत् प्रमाणपत्रम्, वर्षद्वयं पूर्यते चेत् डिप्लोमा, वर्षत्रयानन्तरं स्नातकोपाधि: च प्रदीयते । तथापि वर्षचतुष्टयस्य स्नातककार्यक्रमे बहुविषयकशिक्षाया: उत्तेजनं क्रियते यतोहि तदा विद्यार्थिन: अभिरुच्यनुगुणं चितस्य मुख्यविषये सहायकविषये च केन्द्रीकरणेन सह समग्रबहुविषयकशिक्षाया: अनुभवं प्राप्तुं अवसरो लभ्यते । कश्चन शैक्षणिक- क्रेडिटकोश: (एबीसी) स्थाप्यते तत् मान्यताप्राप्ताभ्य: भिन्नभिन्नशिक्षणसंस्थाभ्य: प्राप्तक्रेडिट डिजिटलरूपेण संकलनं करोति येन प्राप्तक्रेडिट - आधारेण उच्छचशिक्षासंस्था: पदवीं दातुं शक्नुवन्ति । यदि छात्र: उच्चशिक्षासंस्थया निर्दिष्टाध्ययनस्य स्वक्षेत्रे (क्षेत्रेषु) एकां कठिनशोधपरियोजना पूर्णं करोति चेत् चतुर्वर्षीयकार्यक्रमे शोधसहितोपाधिमपि प्रदातुं शक्यते ।

11.10 उच्चशिक्षासंस्थानां (एचईआई) कृते विभिन्नप्रारूपेषु स्नातकोत्तरकार्यक्रमान् संचालयितुम् आनम्या भवति (क) वर्षत्रयस्य स्नातककार्यक्रमं समापितवतां विद्यार्थिनां कृते वर्षद्वयस्य कार्यक्रमं प्रदातुं शक्यते किन्तु द्वितीयवर्षं पूर्णरूपेण शोधकेन्द्रितं स्यात् । (ख) ये विद्यार्थिनः वर्षचतुष्टयस्य शोधेन सह स्नातककार्यक्रमं समापितवन्तः तेषां कृते एकस्य वर्षस्य स्नातकोत्तरकार्यक्रमोपि भवितुमर्हति। (ग) पञ्चवर्षाणाम् एकीकृतस्नातक/ स्नातकोत्तरकार्यक्रमोपि शोधोपाध्यर्थं स्नातकोत्तरोपाधिः अथवा शोधेन सह प्राप्तः वर्षचतुष्टयस्य स्नातकोपाधिः अनिवार्यो भवति । एम्. फिल कार्यक्रमस्य स्थगनं क्रियते ।

शिक्षानीत्याः 11 बिन्दौ उल्लिखितानुसारं बहुविषयकविश्वविद्यालयाः इत्यस्य मार्मिकः अर्थ शिक्षिताः जनाः आत्मनिर्भराः भवेयुः तदर्थं जनाः विभिन्नकुशलयुताः भवेयुरिति ।

**संस्कृतक्षेत्रम्** - संस्कृतक्षेत्रं वास्तविकरूपेण अतिविस्तृता आसीत् प्राचीनकाले। उदा :-

वेदाः - 1. ऋग्वेदः 2. यजुर्वेदः 3. सामवेदः 4. अथर्ववेदः।

उपवेदाः - 1.आयुर्वेदः, 2. धनुर्वेदः, 3. गन्धर्ववेदः, 4. अर्थवेदः।

वेदाङ्गानि - 1. शिक्षा 2.व्याकरणम् 3. निरुक्तम् 4. छन्दः, 5. ज्योतिषम् 6. कल्पम्। वेदोपाङ्गानि - 1. वैशेषिकः, 2. न्यायः 3.सांख्यः 4.योगः 5.पूर्वनीमांसा 6.उत्तरमीमांसा। ब्रह्मणानि - शतपथ-ताण्ड्य-तैत्तिरीयादीनि।

आरण्यकानि - बृहदारण्यकम्, ऐतरेयारण्यकं, तैत्तिरीयारण्यकम् इत्यादीनि।

उपनिषदः - ईश-केन-कठ-मुण्डक-माण्डूक्य-छान्दोग्यादयः।

इतिहासाः - रामायणभारत्वादयः।

अलङ्कारशास्त्राणि - काव्यप्रकाश-ध्वन्यालोक-काव्यालङ्कारसूत्रादीनि।

गृह्य-धर्म-शुल्बसूत्राणि - आपस्तम्ब-गौतम-बौधायनऋषिप्रणीतानि।

पुराणानि - मत्स्य-मार्कण्डेय-कूर्म-वामन-वायुपुराणादीनि।

पितृविद्या (नृवंश - विज्ञानम्) - ......

शशिविद्या (गणितशास्त्रम्) - लीलावतिगणितम्, आर्यभटीयम्, सिद्धान्तशिरोमणिः इत्यादयः।

दैवविद्या (वर्षविज्ञानम्) - बृहत्सहितादि ग्रन्थाः।

निधिविद्या (खनिजशास्त्रम्) - .....

वाकोवाक्यम् (विधि एवं तर्कशास्रम्)

नीतिशास्रम् - पञ्चतन्त्रम्, शुक्रनीतिः, हितोदपदेशादयः।

देवविद्या (देवशास्त्रम्)

ब्रह्मविद्या (अध्यात्मम्)

भूतविद्या (जन्तुशास्रम्)

क्षेत्रविद्या (सस्यविद्या)

नक्षत्रविद्या (ज्योतिषम्) - बृहत्पराशरहोराशास्त्रम्, बृहत्संहिता, सूर्यसिद्धान्तम् इत्यादयः।

सर्पविद्या (विषविज्ञानम्)

देवजनविद्या (गान्धर्वविद्या) सङ्गीतरत्नाकरः, सङ्गीतराजः इत्यादयः।

नाराशंसीविद्या (मनुष्यसम्बन्धविद्या) - .....

एतादृश प्रधानविद्यासु आन्तरिकविद्या: अपि आसन्। आधुनिकाधिगमप्रणाल्यां पाठ्य- क्रमस्य प्रधानोद्देश्यमस्ति केवलम् आजीविकाया:। एवञ्च विविधा: उद्योगसम्बद्धा: एव सन्ति। परं प्राचीनाधिगमप्रणाल्यां शिक्षाविषया: परा - अपरा- विद्यारूपेण द्विप्रकारकशिक्षाविषया: पाठ्यक्रमे आसन्। अर्थात् (लौकिक) उद्योगविद्या: सैनिक -उपाध्याय - राजनीति - व्यापारादि विद्या:, (अलौकिकविद्या:) अध्यात्मिकविद्या:। अत्र वेदोपनिषद्ब्रह्मादि विद्या: छात्रम् उत्तमव्यक्तितत्ववन्तं, गुणवन्तं, दायित्ववन्तं च कर्तुं भारतीयप्राचीनाधिगमप्रणाल्यां मूल्यात्मकशिक्षाविषया: आसन् इत्यत्र न अतिशयोक्ति: न च संशय: विद्यते।

एतदतिरिक्ततया तदा वाकोवाक्येतिहासपुराणवैद्यशास्त्रादय:।पाठनीयविषया: आसन्। धनुर्विद्याया: शिक्षणमपि दीयते स्म परन्तु सामान्यपाठ्यक्रमे तस्य स्थानं नासीत्। वायसविद्या, गोलक्षणम्, अश्वलक्षणं, सर्पविद्या, वास्तुविद्या, रसतत्त्वनिरूपणम्, कृषिकर्म, वस्त्रनिर्माणम्, पशूनामुपचार:, मार्गप्रबन्ध: इत्यादयो बहव: आधुनिकविषया: पाठ्यक्रमे आसन्निति भाष्योक्तोदाहरणै: स्फुटं प्रतीयते। याज्ञिकशास्त्रं तु अवश्यं पाठ्यक्रमे आसीत्। अङ्गविद्या, क्षेत्रविद्या, धर्मविद्या, ब्रह्मविचार: इत्यादयो विषया: अवलोक्यन्ते। सूत्रग्रन्थास्तु वेदाङ्गेष्वेव अन्तर्गता: भवन्ति। एवं प्रकारेण महाभाष्ये पतञ्जलिना तत्र तत्र उदाहरणै: उपस्थापितपाठ्यविषया: तदानीन्तनकाले आसन्निति ज्ञायते। एवमेतावता कृतपरिशीलनेन विमर्शनेन तथैव च राधाकुमुदमुखर्जीमहोदयस्य परिशीलनेन च परा अपराविद्या: वर्तन्ते स्म।

परञ्च आधुनिके काले प्राचीनाविद्या:/पाठ्यक्रमा: नूतनविज्ञानास्य कारणेन प्राचीनविद्या: पाठ्यचर्यायां न दृश्यन्ते। केचने विषया: पाठ्यचर्ययां दृश्यन्ते यथा व्याकरणं, काव्यसाहित्यं, दर्शनं, पौरहित्यं वेदा: च अत्रापि एतै: केवलं शिक्षणवृत्तिं विहाय अन्या कापि वृत्त्यात्मका:, आत्मनिर्भराय कौशलविकासात्मिका: पाठ्यचर्या: संस्कृतक्षेत्रे दुर्बला: दृश्यन्ते। अपि च अनेकेषाम् पाश्यात्यानां दुराक्रमणेनापि भारतीयविद्यानां ह्रास: जातेति विषय: निर्विवादांशेति मे भाति ।

**संस्कृतविद्यालया:** - सर्वेऽपि संस्कृतविद्याभ्य:/संस्कृतस्थविद्याभ्य: वा प्राचीनकाले भारतीया: आत्मनिर्भरा आसन् इति इतिहासेन ज्ञायते। यथा कृषिविद्यया कृषिकार्यं, आयुर्विद्यया चिकित्साकार्यं, लोहविद्यया लिहकार्याणि , अध्यात्मिकविद्यया आत्मन: सन्तुष्टा: इत्येवं नैकाभि: विद्याभि: कौशलानि सम्प्राप्य आत्मनिर्भरा: प्रजा: आसन् । सर्वकारस्य आजीविका: केवलम् आङ्लेयानां शासनकालात् भारतीया: तेषाम् अधिने बानिसा: भवेयुरिति शिक्षया सर्वकारस्य उद्योगा: भवन्तीति काचित् परम्पारा प्रसारितेति इतिहासेन ज्ञायते। कस्तात् चित् कालात् संस्कृतक्षेत्रे संस्कृतविद्यया केवलं शिक्षणव्यवसायं पौरवहित्यव्यवसायञ्च विहाय: अन्य: कोपि व्यवसाय: न दृश्यते । साम्प्रतं तावत् समाज: धावति अस्मिन् समये शिक्षापि नवरूपं प्राप्य नूतनज्ञानविज्ञानेन मनुष्येषु विद्यमानानां विभिन्नकौशलानि बहिरानीय व्यावसायकान् निर्माति। अत: नवसमाजानुसारं संस्कृतक्षेत्रेऽपि नूतनपरिवर्तनानि यदि नानीयन्ते तर्हि संस्कृतक्षेत्रे बहूनि पन्थाह्वानानि अभिमुखीकर्तव्यानि भविष्यन्तीति विद्वद्भि: भणितम्। अर्थात् आधुनिकवैज्ञानिकविषयेषु यथा विभिन्नकौलव्यावसायिकपाठ्यक्रमा:/पाठ्यचर्या: निर्मीयन्ते तथैव संस्कृविद्याया: अपि व्यावसायिककौशलात्मकपाठ्याक्रमा: निर्मेतव्या: भवन्तीति मे अभिप्राय: तेन संस्कृक्षेत्रे आत्मनिर्भरता दृश्येत ।

**संस्कृतविद्यालयपाठ्यक्रम:**- विश्वे नैकानि राष्ट्रानि वर्तन्ते । तत्र भारतमन्यमेव यत: इत: नैकानि राष्ट्रानि शिक्षितानि। अस्य कारणम् अस्मिन् राष्ट्रे उद्भूतं ज्ञानम् इति नास्ति सन्देह:। प्रत्येकं राष्ट्रं देशकालपरिस्थित्यनुसारं तस्य देशस्य प्राचीनज्ञानविज्ञानं पुरोगतिं प्राप्नोत्। किन्तु भारते नैकेषाम् दुराक्रमाणां कारणेन अधुनैव विकास: जायमान: वर्तते। तत्रापि पाश्चात्यानां ज्ञानविज्ञानस्य अनुकरणेन अधुना पर्यन्तं भारतस्य स्वकीयज्ञानस्य विज्ञानस्य विकास: न जातेति परिलक्ष्यते। परन्तु साम्प्रतं कश्चन सन्धिकाल: वर्तते यत् भारतं पुन: वैभवं साधयितुं प्रत्येकं व्यक्ति: आत्मनिर्भर: च भवितुं, सनातनसंस्कृते: विकासाय च प्रयतमानं वर्तते।

प्रामुख्येन शिक्षाजगति महत् परिवर्तनं जायमानमस्ति। शिक्षिता: आत्मनिर्भरा: च जायमाना: च वर्तन्ते। तथैव संस्कृतशिक्षाजगति अपि परिवर्तनम् अवश्यं भवेत् तेन संस्कृतम् अधीयानानाम् छात्राणाम् आत्मनिर्भरता भवितुमर्हति। तदर्थं केचन पाठ्यक्रमा:/पाठ्यचर्या:/उपया: अनुप्रयोक्तव्या: वर्तन्ते यथा–

**पाठ्यक्रमा:**

**1.नाटकम्/भारतीयं चित्रमन्दिरं**:- नाटकात् चलचित्ररङ्गं प्रति गन्तुम् अयं कश्चन सुवर्ण: अवकाश: संस्कृतच्छात्राणाम् आत्मनिर्भरतायै यत् भारतीयं चित्रमन्दिरं (इन्डियन् थीयेटर्) इति नाम्ना पाठ्यक्रमं भरतनाट्यशास्त्रदिशि तथा आधुनिकचलचित्रदिशि च निर्मीयते चेत् संस्कृतच्छात्रा: चलचित्ररङ्गे नटा: निर्देशिका: वा जायन्ते।

**2. कथा रचना** :- अद्यत्वे पुस्तकरचयितार: तथा प्राचुर्येण न दृश्यन्ते। अमुं लोपं पूरयितुं संस्कृतसाहित्यविभाग: शक्नोति कथमिति चेत् केवलं साहित्यशास्त्रे अलङ्कारग्रन्थानां सिद्धान्तानाञ्च बोधनेन सह कथा रचयितृणानिर्माणार्थं प्रायोगिककार्याणि योजनीयानि कदाचित् एकया कथया छात्रस्य जीवनमेव अर्थिकरूपेण स्थिरो भवेत्। अपि च साहित्यशास्त्रस्य बोधनं कौशलविकासात्मिका च भवेत् तेन कथां, ग्रन्थं च लिखेयु: इति मे मति:।

**3. अनुवाद**: :- प्रपञ्चे नैका भाषा: तत्र अनन्तं साहित्यम् अत: तस्य साहित्यं सर्वेभ्य: प्रददातुं , संस्कृतसाहित्यस्य ज्ञानं अन्येभ्य: च दातुं संस्कृतात् अन्याभाषां प्रति अन्याभ्य: भाषाभ्य: संस्कृतं प्रति अनुवादकार्याणि कर्तुम् अनुवादका: अपेक्षन्ते तदर्थं अनुवादपाठ्यक्रम: भवितुमर्हति।

**4. योगचिकित्सा** :- योग: केवलं शास्त्रत्वेन वा शरीरविकासत्वेन न अपि च चिकित्साशास्त्रत्वेन परिचय: कर्तव्य: भवति। तदर्थम् आधुनिकविज्ञानेन सह योगचिकित्सासम्बद्ध: कश्चन पाठ्यक्रम: भवितुमर्हति।

**5. संस्कृतभाषा/भाषाविज्ञानं** :- साम्प्रतं भाषाविश्वविद्यालयेषु विशेषेण संस्कृविश्वविद्यालयेषु संस्कृभाषाविकास: ह्रास: वर्ततेति अहं भावयामि। अपि च संस्कृतभाषाविज्ञानं अन्यभाषाविज्ञानाय अपि मूलाधार: वर्तते। अत: भाषापाठ्यक्रम:/भाषाविज्ञान्नपाठ्यक्रम: पृथक् भवितुमर्हति इति मे मति:।

**6. संस्कृतसङ्गीतम्** :- सङ्गीतशास्त्रं संस्कृताधीनम् अत: संस्कृविश्वविद्यालये सङ्गीतपाठ्यक्रम: भवितुमर्हति तेन केचन संस्कृतच्छात्रा: आत्मनिर्भरा: भवेयु:।

**7. वास्तुशास्त्रं निर्माणं शास्त्रञ्च** :- वास्तुशास्त्रं प्राय: सर्वै: अनुस्रीयते एव तत्र वास्तुविज्ञानेन सह आधुनिकं निर्माणं शास्त्रं समायोज्य कञ्चन पाठ्यक्रमं निर्मातुं शक्यमति मे मति:।

**8. आयुर्विज्ञानम्** :- आयुर्विज्ञानं संस्कृतहस्तेभ्य: बहोकालात् दूरं गता आसीत् । अत: पुन: संस्कृतक्षेत्रे आधुनिकप्रविधिना सह आयुर्विज्ञानस्य/वेदस्य पाठ्यक्रम: संकृतक्षेत्रे भवितुमर्हति।

**9. नृत्यम्** :- नृत्यस्यापि मूलं संस्कृतमेव अत: भारतीयनृत्यस्य पाठ्यक्रम: संस्कृतविश्वविद्यालये भवितुमर्हति।

**10. भारतीयासंस्कृति**: :- देशस्य अस्थित्वं संस्कृत्याम् आधारितं भवति। अत: भारतीयसंस्कृते: संरक्षणाय, परम्परां संरक्षयितुञ्च संस्कृते: सम्बद्धा कश्चन पाठ्यक्रम: भवितुमर्हति।

**उपसंहार**: :- राष्ट्रियशिक्षानीत्यां (2020)विश्वविद्यालया: बहुविषयात्मिका: विश्वविद्यालया: भवेयु: इत्यस्य सम्प्रत्यय: मया एवम् अवगत:यत् संस्कृतच्छात्राणाम् आत्मनिर्भरतायै , आजीविकायै च अवसरं प्राप्नुयु: तदर्थं समग्रतविकास:सम्पादनाय अवसरोपि कल्पनीय: तदर्मपि संस्कृतक्षेत्रे संस्कृतसम्बद्धा: विभिन्नपाठ्यक्रमा: निर्मातव्या: ते च पाठ्यक्रमा: कौशलविकासाय भवेयु: न तु केवलं बौद्धिकविकासाय तेन संस्कृतमधीयाना: छात्रा: शिक्षकवृत्तौ एव न भिन्नेषु व्यवसायेषु च आजीविकां स्वयमेव सम्पादयेयु: इति मे धी:।

**सन्दर्भग्रन्थसूची**

1. 2020 राष्ट्रियशिक्षानीतिः - भारतसर्वकारः।
2. आभासीयपटलम् ।
3. भारतीयज्ञानपरम्परा (ए.ऐ.सि.टि.ई) आभासीयपटलम्।
4. Rew. F.E KEar - Ancient Indian Education, Cosmo Publications, New Delhi, 1992.